अयोध्यां गतयोर्भरतशत्रुघ्नयो रामो गोदावरीं नदीं प्राप्य देवपितॄंस्तर्पयित्वा स्नानमकार्षीत् । ततः

कृताभिषेकः स रराज रामः सीताद्वितीयः सह लक्ष्मणेन ।
कृताभिषेको गिरिराजपुत्र्या रुद्रः सनन्दिर्भगवानिवेशः ॥१॥

तदा पूज्यमानो महर्षिभिः पर्णशालायां प्रियभार्यया सह सुखमुवास । अथामुष्मिन्समये काचन महती राक्षसी शूर्पणखा नाम तस्मिन्दण्डकारण्ये ऽवसत् । सा च क्रूरकर्मा विरूपा निशाचरकन्या राक्षसाधिराजस्य त्रिलोककण्टकस्य दशग्रीवस्य रावणनाम्नो भगिन्यभूत् । एकदा सा वने यदृच्छया भ्रमन्ती तौ द्वौ सूर्यचन्द्रोपमौ वीरावद्राक्षीत् ।

सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ।
प्रियरूपं विरूपा सा सुस्वरं भैरवस्वना ॥२॥

दृष्ट्वा च काममोहिता सतीदं वचनमवोचत् । भो वीर

अहं शूर्पणखा नाम राक्षसी कामरूपिणी ।
रावणो नाम मे भ्राता राक्षसो राक्षसाधिपः ।
प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ ॥३॥

अतो मया सहागन्तुमर्हति भवान् । इयं विरूपा न तव सदृशी । त्याज्या सा । अन्यथा मानुषीमल्पोदरीं तव भ्रातरं चाद्य भक्षयिष्यामीति । तां कामपाशबद्धराक्षसीं श्रीरामः स्मितपूर्वमिदं वचनमब्रवीत् । कृतविवाहो ऽस्मि। भ्राता तु मे ऽविवाहितो वीरो ऽनुरूपो भर्ता तव भवेदिति । एवं प्रोक्ता राघवेण कामवशगतेयं रामं सहसा परित्यज्य लक्ष्मणमवोचत् । रूपेण युक्ताहं भार्या तव भविष्यामि । मया सह सुखं दण्डकान्विचरिष्य-सीति । तद्वचनं हासकारणं श्रुत्वा लक्ष्मणो हसन्निवोवाच । दासो ऽस्मि वरानने ऽग्रजस्य रामस्य । रामं सेवस्व विशालाक्षि रामपत्नी भविष्यसि । को हि तवैतादृशं रूपं प्रेक्ष्येमां वृद्धां कुरूपां सीतां न त्यजेदिति । इयं तु राक्षसी कामदेवस्य पञ्चभिरिषुभिर्हता लक्ष्मणोक्तपरिहासमविजानती तद्व-चः सत्यममन्यत । शूर्पणखोवाच च । हे राम

अद्येमां भक्षयिष्यामि पश्यतस्तव मानुषीम् ।
त्वया सह चरिष्यामि निःसपत्ना यथासुखम् ॥४॥

इत्युक्त्वा सा सुसंक्रुद्धा सीतामभ्यगमद् बुभुक्षोन्मत्तव्याघ्री कोमलमृगशावकं यथा । रामस्तु कुपितस्तां निवारयामासोवाच च । क्रूरैरनार्यैः सौमित्रे परिहासो न कदाचित्कार्यः । इमां लम्बोदरीं राक्षसीं विरूपयितुमर्हसि पुरुषव्याघ्रेति । तच्छ्रुत्वा भयपीडितां वैदेहीं च दृष्ट्वा रामानुजः स्व-खड्गमुद्धृत्य राक्षस्याः कर्णनासाश्चिच्छेद । इयमपि विच्छिन्नकर्णनासा प्रतोदहतकरेणुवन्नदन्ती स्रवच्छोणिताच्छादिताननना भ्रातरं खरं तत्सर्वं निवेदयितुं दुद्राव । जनस्थानं प्राप्य महाबलं खरं चतुर्दशसहस्रेण दारुण-राक्षसानां संवृतमुपविष्टं सा विरूपिता भयमोहक्रोधमूर्च्छिता स्वविरूपणकथां निवेदयन्ती भूमौ निपपात ॥